# गद्यसाहित्य

## लघूत्तरीयाः प्रश्नाः

१. गद्यम् किम्?

১. গদ্যম্ কিম্?

उत्तर : 'अपादो पदसन्तानो गद्यम्'।

উত্তর। 'অপাদো পদসন্তানো গদ্যম্'।

२. गद्यसाहित्यस्य प्राचीनतमं निदर्शनं कुत्र समुपलभ्यते?

২. গদ্যসাহিত্যস্য প্রাচীনতমং নিদর্শনং কুত্র সমুপলভ্যতে?

उत्तर : शुक्लयजुर्वेदस्य वाजसनेयिसंहितायाम्।

উত্তর। শুক্লযজুর্বেদস্য বাজসনেয়িসংহিতায়াম্।

३. गद्यस्य मुख्यतः कियन्तौ भेदौ स्तः?

৩. গদ্যস্য মুখ্যতঃ কিয়ন্তৌ ভেদৌ স্তঃ?

उत्तर : विभागद्वयम्-कथा आख्यायिका चेति।

উত্তর। বিভাগদ্বয়ম্-কথা আখ্যায়িকা চেতি।

४. अग्निपुराणानुसारं गद्यं कतिधा विभक्तम्?

৪. অগ্নিপুরাণানুসারং গদ্যং কতিধা বিভক্তম্?

उत्तर : अग्निपुराणे गद्यस्य भेदपञ्चकं स्वीकृतम्।

উত্তর। অগ্নিপুরাণে গদ্যস্য ভেদপঞ্চকং স্বীকৃতম্।

५. अग्निपुराणानुसारं गद्यभेदानि कानि भवन्ति?

৫. অগ্নিপুরাণানুসারং গদ্যভেদানি কানি ভবন্তি?

उत्तर : आख्यायिका, कथा, खण्डकथा, परिकथा, कथालिका चेति।

উত্তর। আখ্যায়িকা, কথা, খণ্ডকথা, পরিকথা, কথালিকা চেতি।

६. कथाप्रकारकं गद्यकाव्यं किं भवति?